# A-I/1/2302/22

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बौद्धतर्कभाषाकारः कस्य महाविहारस्य आचार्यः?
2. बौद्धतर्कभाषायाः तृतीयपरिच्छेदस्य कः प्रतिपाद्यविषयः?
3. बौद्धतर्कभाषायाः मङ्गलपद्यं लिखत।
4. स्वार्थानुमानं शब्दात्मकं ज्ञानात्मकं वा?

**अथवा**

5. तर्कभाषानाम्ना कति ग्रन्थाः प्राप्यन्ते? के च तेषां 'रचनाकाराः'?
6. 'परार्थानुमानं ज्ञानात्मकं' इति कथनं सत्यम् असत्यं वा?
7. सांख्याः कति प्रमाणानि स्वीकुर्वन्ति? नामानि लिखत।

**अथवा**

8. 'मानाधीना मेयसिद्धिरिति बौद्धाः स्वीकुर्वन्ति' कथनमिदं सत्यमसत्यं वा?
9. आचार्यधर्मकीर्तिना प्रमाणविषयकाः कति ग्रन्थाः रचिताः? के च ते?
10. प्रमेयद्वयं लिखत।

**अथवा**

हेतोः त्रैरूप्यं लेखनीयम्।

11. स्वार्थनुमानस्य लक्षणं यथाग्रन्थनयेन लिखत।
12. अनुमानस्य विषयः कः?

**अथवा**

अनुमानप्रमाणं कतिविधम्? पाठ्यग्रन्थदिशा लिखत।

13. 'यदुत्पत्तिमत् तदनित्यम्' इति कस्य हेतोः उदाहरणम्?

**अथवा**

व्याप्तिः का?

14. कार्यहेतोः साधर्म्यवान् प्रयोगो लेखनीयः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

15. पाठ्यग्रन्थस्य मङ्गलपद्यं विलिख्य व्याख्या विधेया।

16. सप्रसङ्गं व्याख्येयम् –

आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्। संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम्॥

**अथवा**

भागा एव हि भास्नते सन्निविष्टास्तया तथा। तद्वान्नैव पुनः कश्चिन्निर्भागः सम्प्रतीयते॥

17. लिङ्गस्य त्रिरूपत्वं त्रिरूपप्रयोगस्य च प्रयोजनं विमृशत।

18. सप्रसङ्गं व्याख्यात –

षट्केन युगपद्योगात् परमाणोः षडशता। षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः॥

**अथवा**

तर्कभाषामिमां कृत्वा पुण्यमासादियन्मया। तेन पुण्येन लोकोऽयं बुद्धत्वमधिगच्छतु॥

19. अनुमानप्रमाणस्य भेदान् विलिख्य स्वार्थानुमानं व्याख्येयम्।

**स. कश्चन एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धतर्कभाषाकारस्य व्यक्तित्वं कृतित्वञ्चाभिलक्ष्य निबन्धमेकं लिखत।

**अथवा**

'अनुमानप्रमाणम्' इति विषयोपरि एको शास्त्रीयनिबन्धो लेख्यः।

**अथवा**

अपोहनिरूपणं सामान्यनिरसनं च यथाग्रन्थं व्याख्यात।

# A-I/2/2303/22

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. केचन दश प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अभिधर्मकोशस्य कः रचनाकारः? द्वितीयकोशस्थानस्य किं नाम?
2. विज्ञानस्य निर्वचनं नामपर्यायान् च लिखत।
3. कति अनास्रवाणि इन्द्रियाणि? कानि च तानि?

**अथवा**

वितर्कविचारयोः किं नानाकरणम्?

4. दर्शनहेयक्लेशपरिहाणं प्रति कस्येन्द्रिस्य आधिपत्यम्?
5. सुखेन्द्रियं किम्?
6. श्रद्धादीनि पञ्चेन्द्रियाणि कानि?

**अथवा**

अप्रमादः कः?

7. 'अभिधर्म' पदस्य कोऽर्थः?
8. उपेक्षा का?
9. कामावचरं पञ्चविधं चित्तं लिखत।

**अथवा**

मानमदयोः किं नानाकरणम्?

10. कतमे समापत्ती?
11. आयुर्नाम किम्?
12. जीवितेन्द्रियं कतमत्?

**अथवा**

सहभूहेतुः कः? सहभूहेतुसहभागहेत्वोः को भेदः?

13. कति हेतवः ? के च ते ?

14. कति प्रत्ययाः ? के च ते ?

**अथवा**

कः इन्द्रियार्थः ?

15. अभिधर्मकोशे कति कोशस्थानानि ? द्वितीयकोशस्थानस्य किं नाम ?

**ब. केचन पञ्च प्रश्नाः समाधेयाः।** **(5×6=30)**

16. द्वाविंशतिः इन्द्रियाणि स्वाधीतदिशा प्रतिपाद्यताम्।

**अथवा**

17. 'पञ्चकाष्टानां संक्लेशव्यवदानयोः' इत्यस्याः पङ्क्तेः यथाग्रन्थनयेन व्याख्या विधेया।

18. प्रत्ययाः यथाग्रन्थनयेन प्रतिपादनीयाः।

19. कारणं सहभूश्चैव सभागः सम्प्रयुक्तकः।
सर्वत्रगो विपाकाख्यः षड्विधो हेतुरिष्यते॥ –इत्यस्य श्लोकस्य व्याख्या विधेया।

**अथवा**

क्लिष्टा विपाकजाः शेषाः प्रथमार्या यथाक्रमम्।
विपाकं सर्वगं हित्वा तौ सभागं च शेषजाः॥ –इत्यस्य श्लोकस्य व्याख्या विधेया।

20. चित्तचैत्तानां विप्रयुक्तानां च सहोत्पादनियमः यथाग्रन्थनयेन लेख्यः।

**अथवा**

रूपिणां सहोत्पादनियमः स्वाधीतदिशा लेख्यः।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आचार्यवसुबन्धोः व्यक्तित्वं कृतित्वञ्च लिखत।

**अथवा**

अभिधर्मपिटकस्य परिचयो देयः।

**अथवा**

द्वितीयकोशस्थानस्य विषयवस्तु प्रतिपादनीयम्।

# A-I/3/2304/22

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. अतिलघूत्तरीयाः प्रश्नाः। सर्वे समाधेयाः।** **(15×2=30)**

1. त्रिंशिकाविज्ञप्तिमात्रतासिद्धिप्रकरणस्योपरि केन भाष्यं विरचितम् अस्ति?
2. विज्ञप्तिमात्रतासिद्धिरियं कस्य सम्प्रदायस्य ग्रन्थः?
3. त्रिंशिकाविज्ञप्तिमात्रतासिद्धिप्रकरणकारः कः?

**अथवा**

विज्ञप्तिमात्रतासिद्धिग्रन्थः कतिषु भागेषु विभक्तः?

4. विज्ञानवादिनां मते विज्ञानम् अष्टविधं षड्विधं वा?
5. विज्ञानवादिभिः स्वसंवेदनं स्वीक्रियते न वा?
6. विज्ञानवादस्य प्रवर्तकः कः? अस्य दर्शनस्य अपरं नाम किम्?
7. नैरात्म्यद्वयं लिखत।

**अथवा**

धर्मोपचारः कः?

8. त्रिविधिः परिणामः कः?
9. आलरूविज्ञानं कतिभिः चैतसिकैः अन्वितं भवति?
10. स्पर्शः कः?

**अथवा**

कः कर्मकः स्पर्शः?

11. संज्ञायाः लक्षणं लिखत।
12. आलयविज्ञाने का वेदना भवति?

**अथवा**

'तच्च वर्तते स्रोतसौघवत्' इत्यत्र 'तत्' इत्यस्य पदस्य कोऽभिप्रायः?

13. 'तस्य व्यावृत्तिरर्हत्त्वे' इत्यत्र 'तस्य' इत्यस्य पदस्य कोऽभिप्रायः?

14. त्रयः स्वभावाः के?

**अथवा**

षट् क्लेशाः के?

15. कतिविधा निःस्वभावता?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आलयविज्ञानस्य वैशिष्ट्यं लिखत।

17. सर्वत्रगैर्विनियतैः कुशलैश्चैतसैरसौ।
सम्प्रयुक्ता तथा क्लेशैरुपक्लेशैस्त्रिवेदना॥
–अस्याः कारिकायाः सन्दर्भसहिता व्याख्या विधेया।

**अथवा**

'तेनेदं सर्वं विज्ञप्तिमात्रकम्' पङ्क्तिरियं यथाग्रन्थनयेन व्याख्येया।

18. येन येन विकल्पेन यद्यद् वस्तु विकल्प्यते।
परिकल्पित एवासौ स्वभावो न स विद्यते॥
–अधीतग्रन्थदिशा कारिकेयं साधु व्याख्यातव्या।

19. क्लिष्टमनोविज्ञानस्य स्वरूपं यथाग्रन्थनयेन निरूप्यताम्।

**अथवा**

त्रिंशकापकरणस्य विषयवस्तु लेखनीयम्।

20. विज्ञानवादे जन्मान्तरवादः विवेचनीयः।

**अथवा**

अधीतग्रन्थनयेन विज्ञानवाददर्शनं प्रतिपादनीयम्।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. विज्ञानवादे निर्वाणस्वरूपम् अधिकृत्य निबन्धो लेखनीयः।

**अथवा**

त्रिंशिकाप्रकरणस्य विषयवस्तु प्रतिपादनीयम्।

**अथवा**

विज्ञप्तिमात्रताकारस्य देशकालकृतीनां परिचयपूर्वकं बौद्धधर्मदर्शने तस्य योगदानं विलिख्यताम्।

# A-I/4/2305/22

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. मिलिन्द: क:?
2. बोध्यङ्गानि कति? नामानि लिखत।
3. 'मिलिन्दपञ्ञ' ग्रन्थोऽयं मूलरूपेण कस्यां भाषायां निबद्ध:?
4. परमं सुखं किम्?
5. क: सर्वज्ञ: सर्वदर्शी?

**अथवा**

समापत्ते काले व्यायाम: किञ्चित्करो भवति अकिञ्चित्करो वा?

6. कति आयतनानि? कानि च तानि?
7. 'कुहिं पन नागसेनस्स जातभूमीति?
8. कथं बुद्धोऽनुत्तर:?
9. क: सब्बञ्ञू सब्बदस्सावीति?

**अथवा**

कस्य निरोधात्संस्कारनिरोध: भवति?

10. मिलिन्दपञ्ञग्रन्थे कति प्रकरणानि सन्ति?
11. किं नाम पबज्जा? ग्रन्थदिशा लिखत।
12. कतिधाकारै: स्मृति: उत्पद्यते?

**अथवा**

द्वात्रिंशन्महापुरुषलक्षणै: क: समन्वागत:?

13. केन कारणेन समुद्दो लोणरस:?

14. को लभते निब्बानम् ?

**अथवा**

परमं सुखं किम् ?

15. को भगवन्तं पस्सदि ?

**अथवा**

'मिलिन्दपञ्हो' इत्यस्य संस्कृतच्छाया का ? लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कथं बुद्धो अनुत्तरोभवति ? पाठ्यग्रन्थदिशा निरूपयत।

17. द्वात्रिंशन्महापुरुषलक्षणानि लेखनीयानि।

**अथवा**

अनुपिटकवाङ्मयस्य परिचयो देयः।

18. निर्वाणं के लभन्ते ? विवृणुत।

19. बुद्धवग्गस्य परिचयो देयः।

**अथवा**

'कल्लोसि महाराज, पण्डितो थेरो ति' पाठ्यग्रन्थदिशा विवृणुत।

20. अधीतग्रन्थदिशा कर्मफलं विवृणुत।

**अथवा**

अधीतग्रन्थदिशा अनत्तवादः प्रतिपादनीयः।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. मिलिन्दपञ्हग्रन्थस्य तृतीयप्रकरणस्य सारमधिकृत्य निबन्धमेकम् उपनिबद्धीकुरुत।

**अथवा**

भगवतो बुद्धस्य वैशिष्ट्यं प्रतिपादयत।